योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०६६

षट्षष्टितमः सर्गः ६६

वाल्मीकिरुवाच ।

वसिष्ठमुनिसंयुक्ता विश्वामित्रादिसंयुताः ।

स्थिताः खेचरसिद्धौघा विश्रान्ता नृपनायकाः ।। १

सरामलक्ष्मणा सैव तथैवाथ सभा बभौ ।

सौम्या समसमाभोगा शान्तवातेव पद्मिनी ।। २

अनवेक्ष्य वचः प्रश्नमुवाचाथ मुनीश्वरः ।

बोधयन्ति बलादेव सानुकम्पा हि साधवः ।। ३

श्रीवसिष्ठ उवाच ।

राजन् रघुकुलाकाशशशाङ्क रघुनन्दन ।

ह्यो मया ज्ञाननेत्रेण स भिक्षुः प्रेक्षितश्चिरम् ।। ४

ध्यानेनाहं चिरं भ्रान्तस्तादृग्भिक्षुदिदृक्षया ।

द्वीपानि सप्त विपुलां कुलशैलसपर्वताम् ।। ५

यावत्कुतश्चिदप्येवं भिक्षुर्लब्धो न तादृशः ।

कथं किल मनोराज्यं बहिरप्युपलभ्यते ।। ६

ततस्त्रिभागशेषायां रात्र्यां पुनरहं धिया ।

उत्तराशान्तरं यातो वेलावात इवार्णवम् ।। ७

जिननामैष तत्रास्ति श्रीमान् जनपदो महान् ।

वल्मीकोपरि तत्रास्ति विहारो जनसंश्रयः ।। ८

तस्मिन्विहारे स्वकुटीकोशे कपिलमूर्धजः ।

भिक्षुर्दीर्घदृशो नाम स्थित एव समाधये ।। ९

एकविंशतिरात्रं च तस्यैवं स्थितिशालिनः ।

दृढार्गलं गृहं ध्यानभङ्गभीता विशन्ति नो ।। १०

भृत्याः प्रियाः किल तथा संतिष्ठति स भिक्षुकः ।

अद्यैव तस्य संवेत्तुं नियतेरीदृशी स्थितिः ।। ११

रात्रयो ध्याननिष्ठस्य गतास्तस्यैकविंशतिः ।

स तु वर्षसहस्त्रानी तथा चित्तेन भूतवान् ।। १२

कस्मिंश्चित्प्राक्तने कल्पे भिक्षुरेव पुराऽभवत् ।

अद्य त्विह द्वितीयोऽस्मिंस्तृतीयो नोपलभ्यते ।। १३

मया तु पुनरन्विष्य चेतसा चतुरात्मना ।

तादृग् भिक्षुस्तृतीयोऽन्यो जगत्पद्मोदरालिना ।। १४

अस्मात्सर्गात्ततो लब्धस्तृतीयस्तादृशाशयः ।

अथान्ये लीलया सर्गा मया संप्रेक्षितास्ततः ।। १५

यावत्तस्मिंश्चिदाकाशकोशशायिनि सर्गके ।

तृतीयो विद्यते भिक्षुर्ब्राह्मश्च सदृशक्रमः ।। १६

एवं तेनैव तेनैव संनिवेशेन भूरिशः ।

भविष्यन्त्यभवन्सर्वे पदार्थाः सर्गसंततौ ।। १७

अस्यां सभायामपि ये मुनयो ब्राह्मणास्तथा ।

भाव्यमेवं समाचौरस्तैरन्यैरप्यनेकशः ।। १८

नारदेनामुना भाव्यं पुनरन्येन चामुना ।

एवं कलनकर्मभ्यां युक्तेनान्येन भूरिशः ।। १९

एवं जन्मादिना भाव्यं व्यासेनापि शुकेन च ।

शौनकेन पुनर्भाव्यं क्रतुना पुलहेन च ।। २०

अगस्त्येन पुलस्त्येन भृगुणाऽङ्गिरसापि च ।

एत एव तथान्ये च एवंरूपक्रियास्पदम् ।। २१

चिराच्चिराद्भविष्यन्ति मायेयं वितता यतः ।

सदृशाचारजन्मानस्त एवान्ये च भूरिशः ।। २२

भूयोभूयो विवर्तन्ते सर्गेष्वप्स्विव वीचयः ।

अत्यन्तसदृशाः केचित्केचिदर्धसमक्रमाः ।। २३

केचिदीषत्समाः केचिन्न कदाचित्पुनस्तथा ।

एवमेषातिवितता महतामपि मोहिनी ।। २४

क्षणेनेहास्ति नो कर्म प्रतिपत्तिर्हि जृम्भते ।

क्वैकविंशत्यहोरात्रा अनन्ताकृतयोऽनघ ।। २५

क्व तासामुपलम्भोऽलमहो भीमा मनोगतिः ।

प्रतिभामात्रमेवेदमित्थं विकसितं स्थितम् ।। २६

नानाकलहकल्लोलं जले प्रातरिवाम्बुजम् ।

जातं संवेदनादेव शुद्धादिदमशुद्धिमत् ।

संसारजालमखिलं सार्चिर्वह्निकणादिव ।। २७

प्रत्येकमेवमुदितः प्रतिभासखण्डः

खण्डान्तरेष्वपि च तस्य विचित्रखण्डः ।

सर्वे स्वयं ननु च तेऽपि मिथो न मिथ्या

सर्वात्मनि स्फुरति कारणकारणेऽस्मिन् ।। २८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मो० निर्वाणप्र० पू० जीवटोपाख्याने भिक्षुसंसृतिकथनं नाम षट्षष्टितमः सर्गः ।। ६६ ।।